लोकप्रियसाहित्यग्रन्थमाला-64

## बृहत्संस्कृत-

# अन्त्याक्षरश्लोकनिधिः

( अकारादिक्रमेण पञ्चदशसहस्राधिकश्लोकानां सङ्कलनात्मकः )

प्रधानसम्पादकः
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः

सम्पादकः
डा. टी. महेन्द्रः

राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

# बृहत्संस्कृतान्त्याक्षरश्लोकनिधौ सङ्कलिता: ग्रन्था:

1. अनर्घराघवम्
2. अभिज्ञानशाकुन्तलम्
3. अभिषेकनाटकम्
4. अमृतलहरी
5. अविमारकम्
6. अलिविलासिसंलाप:
7. उत्तररामचरितम्
8. ऊरुभङ्गम्
9. ऋतुसंहारम्
10. करुणविलास:
11. करुणालहरी
12. कर्णभारम्
13. किरातार्जुनीयम्
14. कुन्दमाला
15. कुमारसम्भवम्
16. गङ्गालहरी
17. चारुदत्तम्
18. दूतघटोत्कचम्
19. दूतवाक्यम्
20. नागानन्दम्
21. नैषधीयचरितम्
22. पञ्चरात्रम्
23. प्रतिज्ञायौगन्धरायणम्
24. प्रतिमानाटकम्
25. प्रास्ताविकविलास:
26. बालचरितम्
27. बुद्धचरितम्
28. भर्तृहरि-नीतिशतकम्
29. भर्तृहरि-वैराग्यशतकम्
30. भर्तृहरि- शृङ्गारशतकम्
31. भाति मे भारतम्
32. मध्यमव्यायोग:
33. महिषासुरमर्दिनीस्तोत्रम्
34. मालविकाग्निमित्रम्
35. मुद्राराक्षसम्
36. मृच्छकटिकम्
37. मेघदूतम्
38. रघुवंशम्
39. रत्नावली
40. लक्ष्मीलहरी
41. विक्रमोर्वशीयम्
42. वेणीसंहारम्
43. शान्तविलास:
44. शिवमहिम्नस्तोत्रम्
45. शिवशतकम्
46. शिशुपालवधम्
47. शृङ्गारविलास:
48. सुधालहरी
49. सौन्दरनन्दम्
50. सौन्दर्यलहरी
51. स्वप्नवासवदत्तम्

अधिरूढया निजनिकेतमुच्चकैः
पवनावधूतवसनान्तयैकया।
विहितोपशोभमुपयाति माधवे
नगरं व्यरोचत पताकयेव तत्॥ (शिशु. 13.36)

अधिरोप्य हरस्य हन्त चापं
परितापं प्रशमय्य बान्धवानाम्।
परिणेष्यति वा युवा न वायं
निरपायं मिथिलाधिनाथपुत्रीम्॥ (शृ.वि. 36)

अधिलवङ्गममी रजसाधिकं
मलिनिताः सुमनोदलतालिनः।
स्फुटमिति प्रसवेन पुरोऽहस-
त्सपदि कुन्दलता दलतालिनः॥ (शिशु. 6.66)

अधिवह्निपतङ्गतेजसो नियतस्वान्तसमर्थकर्मणः।
तव सर्वविधेयवर्तिनः प्रणतिं बिभ्रति केन भूभृतः॥
(शिशु. 16.5)

अधिष्ठितः स्फाटिकशैलशृङ्गे
तुङ्गे निजं धाम निकामरम्यम्।
महोत्सवाय प्रमथप्रमुख्यान्
पृथूनगणाञ्शम्भुरथादिदेश॥ (कुमार. 11.30)

अधीतपञ्चाशुगबाणवञ्चने
स्थिता मदन्तर्बहिरेषि चेदुरः।
स्मराशुगेभ्यो हृदयं बिभेतु न
प्रविश्य तत्त्वन्मयसम्पुटे मम॥ (नैषध. 9.115)

अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्त्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान्कुतः स्वयं
न वेद्मि विद्यासु चतुर्दशस्वयम्॥ (नैषध.1.4)

अधीरमन्याः पतिशोकमूर्च्छिता
विलोचनप्रस्रवणैर्मुखैः स्त्रियः।
सिषिञ्चिरे प्रोषितचन्दनान् स्तनान्
धराधरः प्रस्रवणैरिवोपलान्॥ (बुद्ध.8.26)

अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम्।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती॥ (नैषध. 2.2)

अधृत यद्विरहोष्मणि मज्जितं
मनसिजेन तदूरुयुगं तदा।
स्पृशति तत्कदनं कदलीतरु-
र्यदि मरुज्वलदूषरदूषितः॥ (नैषध. 4.8)

अधृतेः श्रद्दधानस्य सक्तस्यादोषदर्शिनः।
किं हि वञ्चयितव्यं स्याज्जातरागस्य चेतसः॥ (बुद्ध. 4.94)

अधो विधानात्कमलप्रवालयोः
शिरस्सु दानादखिलक्ष्माभुजाम्।
पुरेदमूर्ध्वं भवतीति वेधसा
पदं किमस्याङ्कितमूर्ध्वरेखया॥ (नैषध.1.18)

अध्यध्वमारूढवतैव केनचि-
त्प्रतीक्षमाणेन जनं मुहुर्धृतः।
दाक्ष्यं हि सद्यः फलदं यदग्रत-
श्चखाद दासेरयुवा वनावलीः॥ (शिशु. 12.32)

अध्याक्रान्ता वसतिरमुनाऽप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति।
अस्यापि द्यां स्पृशति वसिनश्चारणद्वन्द्वगीतः
पुण्यःशब्दो मुनिरिति मुहुः केवलं राजपूर्वः॥ (अ.शा. 2.15)

अध्यात्मकुशलस्त्वन्यो निवर्त्यात्मानमात्मना।
किञ्चिन्नास्तीति सम्पश्यन्नाकिंचन्य इति स्मृतः॥ (बुद्ध.12.63)

अध्यापितस्योशनसापि नीतिं
प्रयुक्तरागप्रणिधिद्विषस्ते।
कस्यार्थधर्मौ वद पीडयामि
सिन्धोस्तटावोघ इव प्रवृद्धः॥ (कुमार. 3.6)

अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी।
तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा॥ (शिशु.2.5)

अध्यासिते वयस्याया भवता महता हृदि।
स्तनावन्तरसम्मान्तौ निष्क्रान्तौ ब्रूमहे बहिः॥ (नैषध. 20.48)

अध्यास्य चाम्भःपृषतोक्षितानि
शैलेयनद्धानि शिलातलानि।
कलापिनां प्रावृषि पश्य नृत्यं
कान्तासु गोवर्धनकन्दरासु॥ (रघु. 6.51)

अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष-
स्याहेर्भूयः फणसमुचितः काययष्टीनिकायः।
दुग्धाम्भोधेर्मुनिचुलुकनत्रासनाशाभ्युपायः
कायव्यूहः क्व जगति न जागर्त्यदः कीर्तिपूरः॥ (नैषध. 12.57)

अध्यैष्ट यः परं ब्रह्म न व्यैष्ट सततं धृतेः।
दानान्यदित पात्रेभ्यः पापं नाकृत किञ्चन॥ (सौन्दर.2.12)

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः।

# संस्थानप्रकाशनविक्रयकेन्द्राणि

**DELHI (H.Q.)**

1. The sales Incharge
Rashtriya Sanskrit Sansthan
(Deemed University)
56-57, Institutional Area,
Janakpuri, New Delhi-110058
Ph. 011-28524993, 28521994 Extn 214-215
Fax: 011-28524532 & 28524387
E-mail : rskssale@yahoo.com

**UTTAR PRADESH**

2. The Principal
Rashtriya Sanskrit Sansthan
Ganganath Jha Campus
Chandra Shekhar Azad Park,
Allahabad - 211 108 (U.P.)
Ph. 0532-2460957 Fax: 0532-2460956
E-mail: principal.alld@gmail.com

3 The Principal
Rashtriya Sanskrit Sansthan
Lucknow Campus
Vishal Khand - 4, Gomti Nagar,
Lucknow - 226010 (U.P.)
Ph. 0522-2393748 Fax: 0522-2302993
E-mail: rskslucknow@yahoo.com

**ORISSA**

4. The Principal
Rashtriya Sanskrit Sansthan
Shree Sadashiva Campus
Puri-752001 (Orissa)
Ph. 06752-223439 Fax: 06752-223439
E-mail: sadashivacampus@ortel.net

**JAMMU& KASHMIR**

5. The Principal
Rashtriya Sanskrit Sansthan
Shri Ranbir Campus, Kot-Bhalwal,
Jammu - 181122 (J & K)
Ph. 0191-2623090 Fax: 0191-2623090
E-mail: ranbirjmu@gmail.com

**HIMACHAL PRADESH**

6. The Principal
Rashtriya Sanskrit Sansthan
Ved Vyas Campus
Balahar, Distt. Kangra, H.P. - 177108
Ph. 01970-245409 Fax: 01970-245409
E-mail: principal.garli@gmail.com

**KERALA**

7. The Principal
Rashtriya Sanskrit Sansthan
Guruvayur Campus, P.O. Puranattukara
Trichur (Kerala), Pin-680551
Ph. 0487-2307608 Fax: 0487-2307608
E-mail: rss.guruvayoor@gmail.com

8. The Director
Chinmaya International Foundation
(Shodha Sansthan)
Adi Shankara Nilayam, PO-Veliyanad,
Dist. Ernakulam-682 319 (Kerala)
Off.: 0484-2747307 Fax: 0484-2749729

**RAJASTHAN**

9. The Principal
Rashtriya Sanskrit Sansthan
Jaipur Campus
Triveni Nagar, Gopalpura Bypass,
Jaipur - 302018 (Rajasthan)
Ph. 0141-2761115 Fax: 0141-2760686
E- mail: principaljp.in@gmail.com

**MADHYA PRADESH**

10. The Principal
Rashtriya Sanskrit Sansthan
Bhopal Campus
Sanskrit Marg, Bagh sevania,
Bhopal - 462043 (M.P.)
Ph. 0755-2418043 Fax: 0755-2418003
E-mail: rsksbhopal@yahoo.com

**MAHARASHTRA**

11. The Principal
Rashtriya Sanskrit Sansthan
K.J. Somaiya Sanskrit Vidyapeeth
IInd Floor,SIMSR Building, Vidya Vihar
Mumbai - 400077 (M.H)
Ph. 022-21025452 Fax: 022-21025452
Email: rsksmumbai@yahoo.com

**WEST BENGAL**

12. The Principal
Sri Sitaram Vaidic Adarsh Sanskrit
Mahavidyalaya
7/2, P.W.D. Road,
Calcutta-700 035 (W.B)
Off.: 033-257776250
Fax: 033-25776240

**KARNATAKA**

13. The Principal
Rashtriya Sanskrit Sansthan
Rajiv Gandhi Campus
Sringeri - 577139
Distt. Chikmagalur (Karnataka)
Ph. 08265-251763
Fax: 08265-251763
Email: principal_rgc@hotmail.com
www.sringericampus.ac.in

14. The Director
Poornaprajna Samsodhana Mandiram
Kathriguppa Main Road,
Bangalore-560 028 (Karnataka)
Off.: 080-26694026
Fax: 080-26798679
E-mail: mailppsmb@vsnl.com

**TELANGANA**

15. The Director,
Sanskrit Academy
(Shodha Sansthan)
Osmania University,
Hydrabad-500007
Off.: 040-27070281
Fax: 040-27090020 & 27070281
Email: sanskritacademyhyd@gmail.com
www.osmania.ac.in/sanskritacademy

**TRIPURA**

16. Principal
Rashtriya Sanskrit Sansthan
Eklavya Campus
Radhanagar, Near Budha Mandir,
Agartala, Tripura-799006 (Tripura)
Ph.: 0381-2907858
Fax : 0381-2907859

**UTTRAKHAND**

17. Principal
Rashtriya Sanskrit Sansthan
Shri Raghunath Kirti Campus
Devprayag, Pauri Garwal-249301
(Utttrakhand)
Ph.: 01378-266028
Email : srkcampus@gmail.com


## राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in website : www.sanskrit.nic.in